International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(2): 309-310
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 22-04-2026
Publish : 23-04-2026

**डा. हेमन्त कुमार मुदुलिः**
व्याकरणविभागः प्राध्यापकः
विजयचान्द संस्कृत महाविद्यालयः
समागोल, कुजङ्ग, जगतसिंहपुर,
ओडिशा

**Correspondence:**
**डा. हेमन्त कुमार मुदुलिः**
व्याकरणविभागः प्राध्यापकः
विजयचान्द संस्कृत महाविद्यालयः
समागोल, कुजङ्ग, जगतसिंहपुर,
ओडिशा

# उपनिषद्वाङ्मये प्रकृतेः उपयोगिता विमर्शः

**डा. हेमन्त कुमार मुदुलिः**

सृष्टेः तथा जीवनस्य रहस्यं ज्ञातुमेकं प्रसिद्धं सूत्रं वर्तते। तद् यथा "यथा पिण्डे तथा ब्रह्माण्डे" वस्तुतः गर्भस्थस्य शिशोः भ्रूणं पिण्डं वा येन शिशु जायते इति सर्वथा महत्वपूर्णं भवति। निखिले संसारे सर्वाधिकं रहस्यपूर्णं भवति गर्भधारणम्। तथा च गर्भस्थस्य शिशोः विकाशः मानवमस्तिष्कं च । जडप्रकृतेः पृष्टे चेतना विद्यते। यथा जडा प्रकृति सचेतना सक्रिया च भवति विश्वचेतना अथवा समष्टि चेतना तथा व्यक्तिचेतना अथवा व्यष्टिचेतना तत्त्वतः एका एव भवति। मनुष्य एक विकसित प्राणि भवति। अतः स्वचेतनया (व्यष्टि चेतनया) असौ सचेतन सक्रियश्चभवति अपि च विचारे कर्मणि च स्वतन्त्रः भवति। असौ विश्वचेतनानुकूलं कर्म करोति। अतः असौ अभ्यूदयं सुखं शान्तिं च लब्धुं शक्नुयात्। परन्तु यदा असौ प्रतिकूलं कर्म करोति तदा पतनं दुःखं अशान्तिं च प्राप्नोति। चैतन्यं इश्वरीय तत्वं भवति। उक्तं च - "भूतानामस्मि चेतना"[1] परमात्मा एव मनुष्येषु जीवात्मरुपेण तिष्ठति। असौ जीवात्मा सुखं दुःखं च अनुभवति। मनुष्य स्वस्य अन्तश्चेतनायाः उच्चस्तरे परात्मनः वाणीं श्रोतुं शक्नोति । अतः परात्मना सह संयुज्य कर्म करोति। असौ मनुष्य नरपशुः, नरपिशाचः, महामानवः, देवो वा भवितुं शक्नोति। स्वस्य पतनाय दुःखाय च भगवन्तं भाग्यं च प्रति दोषारोपणं एकं भ्रमात्मकं चिन्तनम्। प्रकृतिः व्यक्ति संरक्षणे जाति प्रजाति परिरक्षणे च सक्रिया भवति। असौ प्रकृति जीवन रक्षणाय पूर्णां व्यवस्थां करोति। परन्तु मनुष्य नीच स्वर्थस्यहोतोः भोगिशक्त्या लिप्तःसन् प्रकृतेः व्यवस्थां छित्वा भित्वा च नानाविधं संकटमामन्त्रयति।

अधम मानवः देश धर्मादीनां अन्तराले उन्मादं विस्तीर्य्य समाज विपद्ग्रस्तं करोति तथा विनाशकारणमपि भवति। प्रकृतिः प्रजननार्थं प्रेरणां प्रददाति उक्तं च-"प्रजनस्यापि कन्दर्पः"[2] नरस्य असंख्येषु शुक्राणुषु योग्यतमः एकः शुक्राणु नार्य्या डिम्बाणुना सह संयुज्य युग्मजरुपेण एका पृथक् जीव सत्ता उत्पद्यते। तत्र स्वस्य जीवात्मा तिष्टति। नरस्य शुक्राणु एव तदा नूतनस्य प्राणिनः लिङ्गनिर्धारणं करोति। परन्तु अत्र नार्य्या डिम्वाणु नूत्तनस्य प्राणिनः लिङ्गनिर्धारणं कर्तुं न शक्नोति । शुक्राणु एव अतीव सक्रियः भवति। लिङ्ग निर्धारणे शुक्राणोः विशेषाधिकारः अस्ति। प्रकृतिः शिशु जन्मनः प्राक् नार्यो मातृत्वस्य गरिमाणं प्रददाति। अपि च शिशुः पोषणार्थं तस्यामेव नार्य्यां दुग्धं सृजति[3]। गर्भे एव नूतनस्य जीवनस्य सूत्रपातं चमत्कारपूर्णं भवति। गर्भस्थस्य शिशोः स्वकीया चेतना एव शिशोः विकाशार्थं दिशां प्रददाति । एतदेव जीवात्मनः चमत्कारः भवति। प्राणिनः जीवात्मनः चेतना विश्वचेतनायाः निर्देशने नियन्त्रणे च कार्यं करोति। प्राणः संञ्चारस्य आदौ चेतना एव तिष्ठति। एतदेव चैतन्यं दिव्यतत्त्वं भवति। जीव विजानी शिशोः विकाशस्य प्रक्रियां वर्णयितुं शक्नुयात् परन्तु असौ एतदपि वक्तुं न शक्क्रुयात् यत् शिशोः एवंभूताविकाशप्रक्रिया कथं भवति तथा विकाशप्रक्रियायाः पृष्ठभूमौ का सत्ता विद्यते। अस्यामेव रहस्यमय प्रक्रियायां जटिलमस्तिष्कः स्नायुतन्त्रिका अद्भूतानि ज्ञानेन्द्रियाणि अस्थीनि मांस-मज्जा-त्वक्-केश-नख- प्रभृतीनि शनैः शनैः उत्पद्यते।

तत्र नेत्रं शरीरस्य वातायन-सदृशं येन मनुष्य बहिर्जगत् अवलोकयितुं शक्नोति। यत् विना जगत् अन्धतमः भवति। नासिकया मनुष्य गन्धं ग्रहीतुं शक्नोति। श्रोत्रेण मनुष्यः ध्वनीना श्रवणं करोति। रसनया मानवः स्वादं जानाति। त्वचा स्पर्शमनुभवति। एतेषां संग्रचन जटिला भवति। तत्र यकृत्-प्लीहा-वृक्क्- हृदय -स्वासयन्त्र- रक्त सञ्चारादीनां परस्परं सन्तुलनं भवति। तत्र तन्त्रीका कोशिका तत्क्षणादेव मस्तिष्कं कार्य्यं जातं सूचयति तत्र जठराग्नि-क्षुधा पाचनक्रिया-रक्त-मेद-रक्तसंचार- श्वसन- मल

मूत्रेत्यागादीनि सर्वाणि कार्य्याणि रहस्यमयरुपेण संचालिकानि भवन्ति। एतद् सर्वं आकस्मिकं न भवति। परन्तु एकया रहस्यमया दैवी योजनया अन्तर्गतं भवति। देह यन्त्रवत् कार्यं करोति। परन्तु एतद् चेतनतया प्राणसतया च यन्त्रमात्रं भवितुं न शक्नोति । गर्भस्थस्य शिशुः ज्ञानेन्द्रियाणां पूर्णःविकाशः गर्भकालेव संजायते। प्रथमतः शिशौ गन्धग्रहणार्थं शक्तिः उत्पद्यते। जन्मकालेव असौ मातुः गन्धं ज्ञातुं शक्नोति । ततः स्पर्श अनुभवति। ततः पञ्चमासानन्तरं असौ शुशुः ध्वनिं ग्रहीतं शक्नोति । तदेव ध्वनिं स्मरति। इत्थं शिशु मातुः ध्वनिना परिचितः भवति। मातुः स्तन्यपानकारणात् शिशौमातरं प्रति आत्मीयता उत्पद्यते।

वस्तुतः माता शिशुं नोत्पादयति। परन्तु शिशुरेव स्वप्रयत्नेन मातुः गर्भात् निष्कर्म्य संसारं प्रविशति। अण्डज प्राण्यपि अण्डात् निष्कर्म्य स्वयमेव संसारं समायाति। शिशुः एकः स्वतन्त्रः नवीन प्राणी वर्तते। यः स्वस्य जीवनयात्रां स्वयमेव करोति। तथा स्वस्य जीवनपथस्य निर्धारणं स्वयमेव करोति ।

एतद् रहस्यमयं भवति यत् अगणितेषु पशुषु पक्षिषु कीटपतङ्गेषु च विकाश प्रक्रियायं एकस्यां सीमायां स्थिरतां विद्यते। परन्तु मनुष्यस्य विकाशप्रक्रियां स्थिरता नोपलभ्यते। अत एव मनुष्य सर्वेषु प्राणिषु श्रेष्ठो भवति। मनुष्येषु पाशविकप्रभृतयः सन्ति, परन्तु तेषु वृद्धि सत्वमपि अस्ति। यतः मनुष्य ज्ञानविज्ञानसाहित्यकला-धर्म-दर्शन-संस्कृति सभ्यतादीनां निर्माणं कर्तुं शक्नोति । एवं च मनुष्यः वृद्धेः सदुपयोगेन देवः तथा दुरुपयोगेन दानवः भवितुं शक्नोति । मनुष्यः चिन्तयति, तर्कयति, कल्पयति, शिक्षयति, तथा प्राप्तस्य ज्ञानस्य धारणेन स्मृतिकोशं पूरयति। अपि च, ज्ञानस्य उपयोगं करोति अतएव अस्य मस्तिष्कं अतीव जटिलं भवति। मनुष्यस्य इयमेव विशेषता भवति यत् असौ सम्प्रेषणाभिव्यक्तिभ्यां अन्यै सह स्वस्य विचाराणां भावनानां च विनिमयं करोति । कदाचित् अभिव्यक्तेः अन्तप्रेरणायाः प्रचण्डतायाः हेतो मनुष्यस्य कण्ठे वाग्तन्तूनां वागीन्द्रियाणां च पूर्णविकाशो भवति। अपि च वाणीनां भाषाणां च विकाशोपि भवति। इत्थं वाणी मनुष्यं समलंकरोति।

प्रकृतेः संञ्चालनं नियन्त्रणं च चिशक्ति मनुष्यस्य एव करोति चिशक्तिः एव सर्वासां विकाशप्रक्रियाणां उपरि वर्तते। चिद् शक्तिः इश्वरीया भवति। एवं च इयमेव चिशक्ति प्रकृतौ अन्तर्भूता भवति। वस्तुतः यद् किञ्चित् अन्तर्भूतं भवति, तदेव विकशितं भवति परमसता एव विकाशस्य विभन्नानां स्तराणामुपरि विविधैः रुपैः स्वात्मानं अभिव्यक्तं करोति । अत एव वेञ्जामिन् फाञ्कलिन् महोदयेन उक्त God reveals[4] चेतना एव जीवनस्य मूले तिष्ठति। अतः जीवनचेतनामयं भवति। जीवनं एकं दैवीतत्वं अस्ति। शनैः शनैः विकशितः भूत्वा मानवजातिः पशुजगतः प्रकृतेश्च उपरि शासनं करोति। असौ मानवः मस्तिष्क शक्त्या सभ्यतां संस्कृतिं च उत्पादयति।

दैवी योजनान्तर्गता प्रकृतिविकाशक्रमे मानवस्य मस्तिष्कं वृद्धि प्रधानतया रचयति। येन माध्यमेन मानवः स्वयमपि विकाशधाराषु सक्ष्यमो भवति। मस्तिष्कस्य शक्तीनां विकाशेन सदुपयोगेन च मनुष्यः महान्ति कार्याणि सम्पादयितुं सक्ष्यमो भवति।

मस्तिष्कस्य स्तर त्रयं भवति। तद् यथा 1) चेतनस्तरम् 2) अवचेतनस्तरम्, 3) अचेतनस्तरं च। अत्र मनुष्यः चेतनस्तरेण परिचितः भवति। चेतन स्तरस्याधारेण मनुष्यः चिन्तनं करोति तथा सर्वमपि क्रियाकलापं सम्पादयति। अवचेतनस्तरं चेतनस्तरस्य सर्वस्या सक्रियतायाः आधारभूतं भवति। परन्तु मनुष्यसाधारणतया एतद् ज्ञातुं न शक्नोति। अचेतनस्तरं सर्वासां सूचनानां ज्ञानानां अनुभवानां च कोषरुपं भवति। यदा मनुष्य कस्य नामवास स्थानादिकं स्मरति तदा तत्र अवचेतनस्तरं सहायतां करोति। स्मरणेन मनुष्यस्य अवचेतनस्तरं सक्रियं भवति। मस्तिष्कस्य देहस्य च परस्परं घनिष्टसम्बन्धः भवति। तत्र एकः अपरं प्रभावितं करोति मस्तिष्कं देहस्योपरि शासनं करोति। एतदपि देहस्य शीर्षभागे तिष्ठति। योगी देहे तिष्टन्नपि देहस्य उर्द्धे तिष्ठष्ति। एवं च संसारे तिष्ठन्नपि संसारात् परं गन्तुं शक्नोति। ध्यानयोगिनः मस्तिष्कस्य चेतना संम्पूर्णं मस्तिष्कं तथा स्नायुतन्त्रमपि प्रकाशयति। ध्यानयोगिनः देहे रोगे संञ्जाते तथा मनसि शोके संयाते सति असौ एतस्मात् उर्द्धं गत्वा एतै रोगशोकादीभिः प्रभावितो न भवति।

असौ ध्यानयोगी मृत्युसमीपं गत्वापि सरलतया प्राण विसर्जनं करोति। अतः उक्तं श्वेताश्वेतरोपनिषद् न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्[5]। When the mind grapples with a great and intricate problem. It makes its advance step, with but little realisation of the gains it has made, until suddenly with an effect of abrupt illumination, it realises its victory[6].

**पाद टिप्पणी**

1. श्रीमद्भगवद्गीता, १०/२०
2. तत्रैव, १०/२८
3. हित्योकेम्पसपृष्ठभागः
4. himself in different ways at different stages of evolution.
5. श्वेतं उप. – २/१२
6. H.G. Well. A History of the world.